National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 07-12
© 2025 NJHSR
www.sanskritarticle.com

**रो.वे. सत्यनारायणाचार्युलु**
सहाचार्यः,वैखानसपौरोहित्यविभागः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**R.V. Satyanarayanacharyulu**
Asst Pro, in Vaikhanasa Pourohitya,
Sri Venkateswara vedic university,
Tirupati, A,P,

# लोके समावर्तनसंस्कारस्य महत्त्वम्, तदावश्यकता च

**रो.वे. सत्यनारायणाचार्युलु**

**उपोद्घातः -**

**शतायुर्वै पुरुषः** इति वेदोक्तिमनुसृत्य मनुष्यस्य सम्पूर्णः जीवितावधिः संवत्सरशतं यावत् निश्चितः। तस्य जीवनकालस्य साफल्यं सम्पादयितुं वर्णाश्रमधर्माः विखनसादिमहर्षिभिः उपदिष्टाः। गृहस्थाश्रमः इतरेषाम् आश्रमाणां निदानभूतः। इतरेषाम् आश्रमिणां सन्तानोत्पादने अधिकारो नास्ति इति हेतोः गृहस्थाश्रमः श्रेष्ठतमो वर्णितः। ब्रह्मचर्याश्रमतो गृहस्थाश्रमप्रवेशात् पूर्वं गृहस्थाश्रमानुकूलं समावर्तनम् आचरणीयम्। ततः समावर्तनसंस्कारस्य स्वरूपं प्रक्रिया च अस्मिन् पत्रे वैखानसागमसम्मतेन वर्ण्यते।

**समावर्तनशब्दार्थः –**

**"सम्यगावर्तत इति समावर्तनम्"**[1]

सम् + आट् – वृतु = वर्तने इति धातोः भावे ल्यट् च (3-3-115) इति सूत्रेण ल्यट् प्रत्यये युवोरकौ (7-1-1) इत्यनादेशे समावर्तनम् इति रूपम्। सञ्चरणमात्रं यौगिकोऽर्थः किन्तु एष शब्दः आगमे संस्कारनिरूपकः रूढः। आवर्तनं – प्रतिनिवृत्तिः दीक्षितीये अस्यार्थः एवं निरूपितः –

"गुरुकुलवासानन्तरं यद्वा शुक्रियव्रतानन्तरं समावर्तनम्" इत्यादि। द्वादशवर्षाणि एकवेदे ब्रह्मचर्यं चरेदिति स्मृत्यनुसारेण तदवधि गुरुशुश्रूषां कृत्वा समाप्तविद्यः समावर्तनमनुतिष्ठेत्। यद्वा शुक्रियनामकं व्रतं अनुष्ठाय अनन्तरमपि समावर्तनं कुर्यात्। गुरोरनुज्ञया गृहस्थाश्रमप्रवेशयोग्यतां प्राप्य पुनरागमनं समावर्तनमित्यर्थः।

**समावर्तनसंस्कारावसरः –**

**"ब्रह्मचर्यान्निवृत्तस्य विवाहयोग्यतासिद्ध्यर्थं समावर्तनसंस्कारम्"**

विद्याभ्याससमाप्तेरनन्तरं गुरुणा अनुज्ञातः ब्रह्मचर्याश्रमं परित्यज्य विवाहयोग्यता प्राप्तये करणीयः संस्कारः समावर्तनम्। उक्तं च स्मृतिमुक्तावल्याम् –

**गुरवे दक्षिणां दत्वा दत्ताप्यशक्तस्तदनुज्ञया।**
**समावृत्योद्वहेत्कन्यां सन्यासमपि वा व्रजेत्**[2] ।।

विद्यान्ते गुरुः अर्थेन निमन्त्र्यः, गुरुणा सूचितां दक्षिणां गुरवे प्रदाय समावर्तनं कुर्यात्। गुरुदक्षिणा प्रदाने असमर्थः तदेव गुरवे विज्ञाप्य तेनानुज्ञातः समावर्तनार्हो भवेत्। कदाचित् गुरुः **"भक्त्या मे प्रीतोऽस्मि"** इति शिष्यमनुजानाति तदपि समावर्तनं कार्यमेव। एवं ब्रह्मचर्याश्रमनिवृत्तिः भवति ततः योग्यां कन्यां परिणीय गृहस्थेन भाव्यम्। स च श्रेयस्करः अपि वा व्रजेतं इत्यनेन सन्यासाश्रमस्वीकारः द्वितीयः पक्षः इति सूचितः। कैरपि स्मृतिकारैरेव ब्रह्मचर्यात् सन्यासस्वीकरणमङ्गीकृतम्।

**स्नातकत्रैविध्यम् –**

समावर्तनस्यैव स्नातकमपि नामान्तरम्।

**त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्च**[3]

**यस्समाप्य वेदं असमाप्यव्रतानि समावर्तते स विद्यास्नातकः।**
**यस्समाप्यव्रतानि असमाप्यवेदं समावर्तते स व्रतस्नातकः।**
**उभयं समाप्य यस्समावर्तते स विद्याव्रतस्नातकः**[4]।।

**विद्यास्नातकः –**

स्नातकाः त्रिविधाः भवन्ति।

1. **विद्यास्नातकः –** विद्यया स्नानं यस्य विद्यास्नातकः। समाप्त वेदाध्ययनः अन्तरं करणीयानि गोदानादिव्रतानि अकृत्वा यः समावर्तनं करोति स विद्यास्नातकः।

2. **व्रतस्नातकः –** वेदव्रतानि समाप्य असमाप्तवेदाध्ययनः एव गुरुकुलात् निवर्तने सः व्रतस्नातकः।

3. **विद्याव्रतस्नातकः –** सम्पूर्णं वेदाध्ययनं कृत्वा वेदव्रतान्यपि चरित्वा यः स्नातको भवति सः विद्याव्रतस्नातकः।

**शुक्रियव्रतविसर्गकालः –**

**उदगयन आपूर्यमानपक्षे तिष्योत्तरेषु चित्राविशाखयोः हस्तरोहिण्योः मृगशिरसि वा न नक्षत्रे[5]।।**

अस्मिन् सूत्रे अयननिर्णयः, मास, पक्षनिर्णयः, तिथिनिर्णयः, नक्षत्रनिर्णयश्च शुक्रियव्रतविसर्जनार्थं निश्चितः।

1. अयननिर्णयः – उत्तरायणं श्रेष्ठम्, यतः तत् देवानां दिवाकालः।

2. मासनिर्णयः – पुष्यमासे, माघमासे, फाल्गुनमासे, चैत्रमासे, वैशाखे, ज्येष्ठमासे च व्रतविसर्गः करणीयः। मकरसंक्रमणात् आरभ्य पञ्चमासाः ग्राह्याः आषाढे दक्षिणायनं सङ्कीर्णं भवति।

3. पक्षनिर्णयः – आपूर्यमाणः पक्षः शुक्लपः, अस्मिन् चन्द्रः कलाभिः पूर्यते इति सार्थकं नाम।

4. तिथिनिर्णयः – रिक्ततिथयः, पर्वतिथयः च वर्जनीयाः। पौर्णमासी, अमावास्या चेति तिथिद्वयं पर्वणी। चतुर्थी, नवमी, चतुर्दशी, इति रिक्ताः तिथयः।

**नक्षत्रनिर्णयः –** पुष्यमी, उत्तरा, उत्तराषाढा, उत्तराभाद्रा, चित्रा, विशाखा, हस्ता, रोहिणी, मृगशिरः इति नक्षत्राणि शुक्रियव्रतविसर्जनयोग्यानि।

**शुक्रियव्रतविसर्जनस्थाननिर्णयः –**

**"यत्रापस्तत्रागारे गोष्ठे वा[6]"**

यत्र यस्मिन् देशे स्वग्रामसमीपे आपः नद्यादिजलानि तिष्ठन्ति तत्र तत्तीरे आगारे स्वस्य गृहे वा गोष्ठे वा गोशालायाम्, यत्र प्रदेशे स्वनिवासभूतस्य ग्रामस्य आरात् जलाशयाः भवन्ति तत्र शुक्रिय-व्रतविसर्जनं करणीयम्। देवालयादिप्रदेशेषु स्वगृहे गवां शालायां वा विसर्जनं कार्यम्।

**उत्तरायणप्राशस्त्यम् –**

**"दक्षिणं त्वयनं रात्रिः देवानामुत्तरं त्वहः[7]"।**

संवत्सरे अयनद्वयं भवति तयोः उत्तरायणं देवानां दिवाभागः दक्षिणायनं च रात्रिः उत्तरति इति उत्तरः। सङ्कटात् तारयति इत्यर्थः। उत्कृष्टः – सर्वोत्तमः भवेत् इति वा उत्तरः। उत् शब्दात् द्विवचनविभज्योपपदे तरबीयसुनो (5-3-57) इति तरप् प्रत्ययः। श्रेष्ठः इत्यर्थः। यद्यपि उत्तरायणे समावर्तनं प्रशस्तं तथापि योग्यायां कन्यायां लब्धायां दक्षिणायनेऽपि विवाहः करणीयः इति तस्यामेव स्मृतौ दृश्यते। विवाहदिने विवाहस्य पूर्वदिवसे वा नक्षत्रादिविचारं विहाय स्नातको भवेदेव तदुक्तं दीक्षितीये –

**विवाहपूर्वदिवसे स्नायाद्वा दक्षिणायने।**

**विवाहपूर्वदिवसे ऋक्षादीनविचार्य स्नायात्[8]।।**

**समावर्तनात्पूर्वं नान्दीनिर्णयः –**

**"पूर्वेद्युः नान्दीमुखं कृत्वा[9]"**

यस्मिन् दिने समावर्तनं निश्चितं ततः पूर्वस्मिन् दिने नान्दीमुखं करणीयम्।

**समावर्तने अग्निनिर्णयः –**

जातकाग्नौ, उपनयनाग्नौ, लौकिकेऽग्नौ वा आघारं हुत्वा त्रिष्वग्निषु पूर्वपूर्वस्याभावे द्वितीये आघारं जुहुयात्। समिधाधाने विच्छिन्ने अवकीर्णप्रायश्चित्तं चरित्वा समिधाधानहोमेन हुत्वा तस्मिन् अग्नौ समावर्तनहोमः करणीयः। तदभावे लौकिकाग्नौ आघारः करणीयः।

**समावर्तने योग्यनक्षत्राणि –**

वैखानसकल्पसूत्रे समावर्तनकर्मणि योग्यानां नक्षत्राणां निर्णयः एवं दृष्टः।

श्रीवैखानसकल्पसूत्रे – **तिष्योत्तरेषु चित्रा विशाखयोः हस्तरोहिण्योः मृगशिरसि वा न नक्षत्रे।।**

तदस्त्यैन्द्राग्न एव नक्षत्रे स्नातं भवत्यधो विशाखोऽसानी।

1. तिष्यः – पुष्यमीनक्षत्रम्। तुष्यन्ति अस्मिन् इति तिष्यः "सूर्य तिष्यागस्त्यमत्यानां य उपधायाः" (6-4-149) इति प्रतिपदोक्तः।
2. उत्तरा – उत्तरति सर्वोत्तमो भवति वा उत्तरा।
3. चित्रा – चित्रमाश्चर्यकरं भवति।
4. विशाखे, 5. हस्ता, 6. रोहिणी, 7. मृगशिरः इति नक्षत्राणि श्रेष्ठानि।

दीक्षितीयेऽपि एतेषु नक्षत्रेषु स्नातकः तत्तत् नक्षत्रानुकूलं सर्वोत्तमं फलं लभते इति श्रुत्युदाहरणपूर्वकं निरूपितम्।

**रोहिणी –** रोहिण्यां स्नातकः सर्वोन्नतं स्थानम् धिरोहति। रुद्र-बीज जन्मनि प्रादुर्भावे च इति धातोः ताच्छीलिके णिनिप्रत्यये रोहिणी इति रूपम्। प्रजापतिः रोहिणीनक्षत्रस्य देवता ततः प्राजापत्यं नक्षत्रं भवति। प्रजापतिः देवता अस्य इत्यर्थे पत्यन्तपुरोहितादिभ्यो यक् (5-1-128) इति सूत्रेण यक् प्रत्यये किति च (7-2-118) इत्यादि वृद्धिः। तस्मिन् नक्षत्रे स्नातः आरोहणीयानि सर्वोन्नतस्थानानि प्राप्नोति।

**तिष्यः –** पुष्यमीनक्षत्रस्य देवता बृहस्पतिः बृहस्पतिः देवता अस्य बार्हस्पत्यम्। सः बृहस्पतिसदृश भाग्यवान् भवत्येव। असानि इति अस-धातोः लोट् उत्तमपुरुष एकवचने रूपं अवश्यं भविष्यामि इति तस्य विश्वासः।

**हस्ता –** हस्ता नक्षत्रस्य सविता देवता। तस्मात् नक्षत्रं सावित्रम्। तस्मिन् नक्षत्रे स्नातः सूर्यप्रसूतिसादृश्यं अर्थात् गायत्रीमन्त्रपारङ्गतः भविष्यति।

**चित्रा –** चित्रा नक्षत्रस्य इन्द्रो देवता ततः ऐन्द्रं नक्षत्रं, इन्द्रशब्दात् सास्य देवता (4-2-24) इति सूत्रेण अण् प्रत्यये रूपम्। स च इन्द्रवत् विचित्रान् भोगान् प्राप्नोति।

**विशाखे –** विशाखयोः इन्द्राग्नी देवते इन्द्रश्च अग्निश्च इन्द्राग्नी। इन्द्राग्नी देवते अस्य ऐन्द्राग्नम्। एतन्नक्षत्रे स्नातको भूत्वा विशाखसदृशः अर्थात् कुमारस्वामितुल्यः भविष्यति।

**समावर्तने शुभलग्नविचारः –**

**चौलवत्सकलं ग्राह्यं स्नातकर्माणि भापते।**

**शुभे लग्ने वासरे च चरेत्तु स्नातकं व्रतम्[10]।।**

चौलेन तुल्या क्रिया यस्य चौलवत् तेन तुल्यं क्रिया चेद्वतिः (5-1-115) इति चौलशब्दात् वतिप्रत्ययः। चौलकर्मणि यादृशानि

साधनानि लग्नवारादि मुहूर्तनिर्णयश्च भवति तान्यत्र योग्यानि भवन्ति। शुभलग्ने शुभदिने स्नातकं करणीयम् इत्यर्थः।
विवाहदिने वा पूर्वदिने वा स्नातकं कर्तव्यम्।

**विवाहदिवसात्पूर्वं तद्दिने स्नानमाचरेत्।**

**विवाहदिवसाधस्तात्भवेत्तु स्नातकव्रतम्। इत्यादि**

**यदा दिवा स्नातकव्रतं तदा रात्रावेव उद्वाहः[11]।।**

विवाहात्पूर्वदिवसे विवाहदिने वा स्नातकं करणीयम्। विवाहदिने प्रातः केनापि कृतस्नातकः रात्रौ विवाहितो भवेत्।

**समावर्तने सम्भाराहरणम् –**

**नववस्त्रं चोत्तरीयोपवीताजिनमेखलाः।**
**सौवर्णे कुण्डले कण्ठाबरणं चाङ्गुलीयकम्।**
**गन्धपुष्पानुलेपान् मुकुरं छत्रमुत्तमम्।**
**उपानहौ वेणुदण्डं वाहनं कर्षणाश्म च।**
**क्षुरं शरावं सशकृत् स्नानोद्वर्तनवस्तु च।**
**मध्वाज्ये दधिक्षीरं कांस्यं कूर्पं च विष्टरम्।**
**सम्भारान् मधुपर्कस्य युग्मदर्भेषु योजयेत्[12]।।**

नूतनवस्त्राणि उत्तरीयं, यज्ञोपवीतं, कृष्णाजिनं, मेखला, सुवर्ममयकुण्डले, कण्ठाभरणं, अङ्गुलीयकं, गन्धः, पुष्पाणि, अञ्जनं, आदर्शः, छत्रं, पादरक्षे, दण्डः, गजरथादिवाहनं, क्षुरिका निकषोपलः, शरावः, गोमयं, उद्वर्तनचूर्णं, मधु, घृतं, पयः, कांस्यपात्रं, कूर्चं, विष्टरं इति सम्भाराः अपेक्षिताः। दर्भान् युग्मसंख्याकान् आस्तीर्य तस्योपरि सर्वाणि द्रव्याणि न्यसेत्।

**समावर्तने प्रधानहोमः –**

**इमंगुंस्तोमं त्र्यायुषं जमदग्नेः इति प्रधानं पञ्चवारुणं मूलहोमं च हुत्वा[13]।।**

इमगँ स्तोमं इति मन्त्रं, त्र्यायुषं इति मन्त्रं च मुख्यतया गृहीत्वा पञ्चवारुणमन्त्रैः मूलहोममन्त्रैः च आहुतीः दद्यात्।

**सूर्योपस्थानम् –**

**"उद्वयं तमसः उदुत्यमम्[14]"** इत्येताभ्यां आदित्यमुपस्थाय उद्वयं तमसः परि, उदुत्यं जातवेदसं इति मन्त्राब्यां सूर्यं नमस्कुर्यात्।

**समावर्तने सूत्रदण्डादिविसर्जनम् –**

उदुत्तमं ......... इति मन्त्रेण वस्त्रं उत्तरीयं च विसृजेत्। "अथावयगुं" इति मन्त्रेण पूर्वदृतं यज्ञोपवीतं, मेखला, कृष्णाजिनं, दण्डः इत्यादिकं उपनीयजले विसृजेत्। दीक्षितीये पुनः यज्ञोपवीतत्यागः न कार्यः तन्न युक्तः सूत्रशब्दः कटिसूत्रपरः तत्त्यागमात्रेण पर्याप्तं भवति इत्युक्तम्।

**समावर्तने वपनविधिः –**

स्नातकस्य वैदिककर्मणि गुरुः पितैव भवति स्नातकस्य पिता शिवोनामासि इति मन्त्रेण क्षुरं निकषे निशितं कुर्यात् साक्षतैः उदकैः शिरः आर्द्रीकरणीयम्। "गोदानमुनक्तु" इति मन्त्रेण गोदान दक्षिणां गुरवे दद्यात्। "ओषधेः त्रयस्वयनं प्रथयति" इति मन्त्रेण प्रागग्रान् दर्भान् साक्षतान् गृहीत्वा द्वौ दर्भौ उत्तराग्रौ निक्षिपेत्। गोदानमु ... इति मन्त्रेणैव प्राच्यां दिशि "आप उन्दन्तु" इति मन्त्रेण शिरसो दक्षिणपार्श्वे, ओषधेः .... इति मन्त्रेण पश्चिमभागे यत्क्षुरेण ...... इति मन्त्रेण उत्तरभागे केशान् छिन्द्यात्।
ततः अम्बष्टाय क्षुरां दत्वा येनावपि ........ इति मन्त्रेण शिखां भ्रुवौ वर्जयित्वा सर्वं वापयेत्। नखान्यपि अपनाययेत्।

**(A) केशनिक्षेपणविधिः –**

शरावे गोमयं निधाय वापितान् केशान् दर्भान् नखान् च निधाय "इदमहममुष्य" इति मन्त्रेण उदुम्बरवृक्षमूले दर्भमूले गोशालायां वा गर्ते निक्षिप्य मृदा पूरयेत्।

**(B) माताब्रह्मचारी प्राधान्यम् –**

**आयुष्याभिवृद्ध्यर्थं माता ब्रह्मचारी वा इत्युक्तम्[15]।**

ब्रह्मचारिणः आयुष्याभिवृद्धये मा एतत् शरावानयनादि कर्म करणीयं इत्युक्तम्। ब्रह्मचारिणापि स्वयं कार्यम्।

**(C) उदुम्बरदर्भयोः फलम् –**

आहारसमृद्धये केशादीनां गर्ते निक्षेपणं उदुम्बरमूले दर्भमूले वा करणीयम् इत्युक्तम्।

**(D) वपनकालः –**

**नृपाज्ञया ब्राह्मणसम्मते च बन्धस्य मोक्षे क्रतुदीक्षणे वा।**

**विवाहकाले मृतसूचके च सर्वेषु शस्तं क्षुरकर्मतेषु[16]।।**

राजाज्ञया ब्राह्मणानुज्ञया क्षौरं कार्यं कारागारात् विमुक्तः यज्ञदीक्षास्वीकारे, दैवकार्यारम्भे, स्नातकव्रते, जाताशौचे, सूतके च क्षौरं कार्यम्। सूतके दशमे अहनि करणीयम्।

**(E) वपने दिक् नियमः –**

**प्राङ्मुख श्मश्रुकर्माणि कारयेत्तु समाहितः।**
**उदङ्मुखस्तु कुर्याद्वै तथाऽऽयुर्विन्दते महत्[17]।।**

प्राङ्मुखः उदङ्मुखो वा कृत वपनः दीर्घमायुः लभते।

**(F) पञ्चाशत् वर्षादूर्ध्वं वपनं कर्तव्यम् –**

**पञ्चाशद्वत्सरादूर्ध्वं वपनं न विधीयते[18]।।**
**विना यज्ञं विना तीर्थं मातापित्रोर्मृतिं विना।**
**यत्कुर्यात्केशवपनं भवेत्स पितृघातुकः।।**
**अनिच्छावपनं प्रोक्तं पञ्चाशद्वर्षतः परम्।**
**पञ्चाशद्वर्षतः पूर्वं अधानादि निमित्तकम्[19]।।**

पञ्चाशद्वर्षवयसः अनन्तरं वपनं न शास्त्रविहितं किन्तु गार्ग्यमते केषुचित् कार्येषु वपनं करणीयमेव। यज्ञारम्भे, तीर्थयात्रासु, मातापित्रोः मृतिकाले, पञ्चाशद्वर्षेषु अतीतेष्वपि वपनं कार्यमेव। विना निमित्तेन कृत क्षौरः पितृघातकेन तुल्यं पापं प्राप्नोति।

**(G) वपनत्रैविध्यम् –**

**कक्षश्मश्रु शिरोरोम्णां वपनं चैव मूर्ध्वतः।**
**अधस्तात् राक्षसं चैषां श्मक्षुकक्षादि मानुषम्।।**
**दैवतं देवतानां च राक्षसं क्रूरकर्मणाम्।**
**मानुषं तु मनुष्याणां वपनं स्यात्त्रिधामतम्[20]।।**

वपनं च 1.दैवतं, 2.रात्रसं, 3.मानुषं चेति त्रिविधं भवति। कक्षयोः मुखस्य श्मश्रुभागस्य शिरसश्च केशानं वपनं दैवतम्। देवकार्येषु एवं करणीयम्। कक्षां श्मश्रुमुखानां क्षौरं मानुषम्। तत् मनुष्यकर्मसु कार्यम्। वक्षसः अधस्थात् वपनं राक्षसम्। आभिचारिकेषु कर्मसु करणीयम्।

**समावर्तने दन्तधावनम् –**

**अन्नाद्याय व्यूहध्वम् इति दन्तधावनं औदुम्बरेण काष्ठेन करोति[21]।।**

अन्नाद्यायव्यूहध्वं इति मन्त्रेण औदुम्बरेणकाष्ठेन दन्तधावनं कुर्यात्।

**समावर्तने स्नानप्रोक्षणम् –**

**शीतोष्णादिभिरद्भिः "आपोहिष्ठा" इत्यादिभिः ऋग्भिः तिसृभिः स्नापयित्वा हिरण्यपवमानाभ्यां प्रोक्षयति[22]।।**

वपन अनन्तरं शीतोदकेन उष्णोदकं मिश्रीकृत्य "आपोहिष्ठा" इत्यादिमन्त्रैः पवमानसूक्तैश्च हिरण्यसूक्तैश्च अभ्यङ्गनं कारयेत्।

आमलकचूर्णं अरिष्ठं हरिद्रां च मिश्रीकृत्य अभ्यञ्जने उद्वर्तनार्थं उपयोज्यम्। ततः पुण्याहकलशोदकेन प्रोक्षणं कार्यम्।

**शुक्रियव्रते अशक्यस्य पक्षान्तरम् –**

**पूर्वं तथा प्रधानान् हुत्वा पुरोदयादित्यस्य ब्राह्मव्रतं विसृज्य शुक्रियव्रतस्य ग्रहणं विसर्गौ इत्येके।[23]।**

**अत्र यथोक्तप्रकारेण शुक्रियव्रतानुष्ठानं कर्तुमशक्तस्य पक्षान्तरमाह। पूर्वमित्यादि। यथा प्राजापत्यादिषु तथा शुक्रियव्रतस्य धातादिपूर्वं अरुणेभ्यः काण्डर्षिभ्यः इत्यादि प्रधानान् हुत्वा इत्यर्थः पुरोदयादित्यादि सूर्योदयात्पूर्वं शुक्रियव्रतस्य ग्रहणविसर्गौ। एके मुख्यान्यकेवलाः इति निघण्टुः[24]।।**

**यथा पूर्वमिमं स्तोममिति प्रधानाहुतीः तथा तां प्रदानां हुत्वा पुरा पूर्व उदयादित्यस्य उदयकालात्प्राक् ब्राह्मव्रतं पूर्वबद्धं विसृज्य तदानीमेव पूर्ववत् शुक्रियव्रतस्य ग्रहणं बन्धो विसर्गो विसर्जनं तौ ग्रहणविसर्गौ कुर्यात्। तां न षाण्मासिकं त्रैमासिकं वा इत्येके वदन्ति[25]।।**

शुक्रियव्रतकरणे अशक्तः स्नातकः कथं भवेत् इति शङ्कया अशक्तस्यापि स्नातककर्मयोग्यता स्मृतिषु अनुगृहीता। वैखानसकल्पसूत्रे प्रधानहोमं कृत्वा ब्रह्मव्रतं विसृज्य शुक्रियव्रतग्रहणं विसर्जनं वा करणीयम्। दीक्षितीये एवं विवृतम् – यथोक्तविधानेन व्रतं कर्तुमसमर्थः धातादि प्रभृति काम्डर्षिपर्यन्तं प्रधानान् हुत्वा शुक्रियव्रतं विसृजेत्। "यथापूर्वं इमं स्तोमम्" इति प्रधानाहुतीः हुत्वा उदयकालात्प्राक् ब्रह्मचर्यकाले गृहीतं दण्डादिकं विसृज्य शुक्रियव्रतग्रहणं, विसर्जनं वा कुर्यात्। सपदि ग्रहणं त्यागश्च तदा विहितौ यथोक्तप्रकारेण षाण्मासिकं, त्रैमासिकं वा करणीयम्।तत्राशक्तः सपदि ग्रहणं विसर्जनं च कुर्यादिव षट्सु मासेषु भवं षाण्मासिकं कालात् ठय् (4-3-11) इति ठय् प्रत्यये छस्येकः (7-3-50) इति इकादेशे तद्धितेष्वचमादेः इत्यादिवृद्धौ षाण्मासिकम् इति रूपम्। एवं त्रैमासिकम्।

**समावर्तने गात्राणां गन्धादिभिः लेपनम् –**

**दिविश्रयस्व इत्यहते वाससी गन्धाबरणादीनि च प्रोक्ष्य नमो ग्रहाय इति गन्धं गृहीत्वा प्राचीनमञ्जलिं कृत्वा अप्परस्सु इति गात्राण्यनुलेपयेत्[26]।।**

**आभरणानि कुण्डलमणिहाराह्गुलीयकादीनि च आदिशब्देन पुष्पाञ्जनदर्पण दण्ड छत्रोपानन्मेखलोपवीताजिन वाहन मधुपर्कादीनि संगृह्यन्ते[27]।।**

दिविश्रयस्व इति मन्त्रेण नूतनवस्त्राणि गन्धाभरणादीनि सम्प्रेक्ष्य नमो ग्रहाय इति मन्त्रेण गन्धं गृहीत्वा अनन्तरं सर्वाणि आभरणानि सम्प्रेक्ष्य धारयेत्। आभरणशब्देन मणिकुण्डलादीनि, आदिशब्देन पुष्पाणि अञ्जनं दर्पणादीनि च संगृहीतानि भवन्ति।

**समावर्तने वस्त्रधारणम् –**

**तेजोवत्स्याव इति वस्त्रं परिधाय सोमस्य तनूरसि इत्युत्तरीयं गृह्णाति[28]।।**

"तेजोवत्स्यावः" इति मन्त्रेण परिधानं धार्यम्। सोमस्यतनूरसि इति मन्त्रेण उत्तरीयं धार्यम्। वस्त्रद्वयधारणानन्तरं गन्धलेपनं धार्यमिति श्रीनिवासदीक्षितानां अभिप्रायः।

**समावर्तने गात्राणां गन्धादिभिः लेपनम् –**

**दिविश्रयस्व इत्यहते वाससी गन्धाबरणादीनि च प्रोक्ष्य नमो ग्रहाय इति गन्धं गृहीत्वा प्राचीनमञ्जलिं कृत्वा अप्परस्सु इति गात्राण्यनुलेपयेत्[29]।।**

**आभरणानि कुण्डलमणिहाराह्गुलीयकादीनि च आदिशब्देन पुष्पाञ्जनदर्पण दण्ड छत्रोपानन्मेखलोपवीताजिन वाहन मधुपर्कादीनि संगृह्यन्ते[30]।।**

दिविश्रयस्व इति मन्त्रेण नूतनवस्त्राणि गन्धाबरणादीनि सम्प्रेक्ष्य नमो ग्रहाय इति मन्त्रेण गन्धं गृहीत्वा अनन्तरं सर्वाणि आभरणानि सम्प्रेक्ष्य धारयेत्। आभरणशब्देन मणिकुण्डलादीनि, आदिशब्देन पुष्पाणि अञ्जनं दर्पणादीनि च संगृहीतानि भवन्ति।

**समावर्तने वस्त्रधारणम् –**

**तेजोवत्स्याव इति वस्त्रं परिधाय सोमस्य तनूरसि इत्युत्तरीयं गृह्णाति[31]।।**

"तेजोवत्स्याव" इति मन्त्रेण परिधानं धार्यम्। सोमस्य तनूरसि इति मन्त्रेण उत्तरीयं धार्यम्। वस्त्रद्वयधारणानन्तरं गन्धलेपनं धार्यमिति श्रीनिवासदीक्षितानां अभिप्रायः।

**समावर्तने मेखलादिधारणम् –**

**पूर्ववत्ते मेखलादीन्याददीत[32]।।**

नृसिंहवाजपेयभाष्ये - पूर्ववत् उपनयनोक्तवत्।
पूर्वस्मिन् इव पूर्ववत्। पूर्वं यः उपनयनविधिः उक्तः तत्रैव मेखलादीनि ग्राह्यानि। "इयं दुरुक्ता" इति मन्त्रेण मेखलां "यज्ञोपवीतम्" इति मन्त्रेण यज्ञोपवीतं "मित्रस्य चक्षुः" इति मन्त्रेण कृष्णाजिनं च बिभ्रुयात्।

**आभरणादिधारणम् –**

**आभरणं कुण्डलमणीन् बदरेण सुवर्णेन वा कृनानाच्छाद्य दर्भेण बध्नीयात्[33]।**

आभरणानि इति पदेन अङ्गुलीयकं, कुण्डले, कण्ठहाराः मौक्तिकहाराश्च ग्राह्याः, धनवद्भिः एतानि धार्याणि। अशक्तैः बदरबीजैः कृतानि आभरणानि वा धार्याणि।तान्यादाय दर्भैः आच्छाद्य दर्भैः एव बध्नीयात्।

**बादरहिरण्यदर्भाणां महत्वम् –**

**अथैतं बादरं मणिं सुवर्णोपधानं सूत्रे पेत्य इति। किञ्च इन्द्रस्य सुषुवाणस्य दशधेन्द्रियं वीर्यं परापतत्। सयत्स्त्रधमं निरष्टीवत्। तत्कलमभवत्। यद्द्वितीयं तद्पदरं इति श्रुतिर्बदरमहत्त्वं वदति। तथा यद्धिरण्यमाबध्नाति। ज्योतिर्वै हिरण्यं, ज्योतिरेवानिमन्ददाति। अधोतेजोवै हिरण्यम्। तेजेवात्मन् धते इति। अधो अपां वा एतत्तेजोवर्चः। यद्दर्भाः इत्यादि श्रुतय हिरण्यदर्भयोः महत्वं च प्रतिपादयन्ति। तस्मादेव आच्छाद्यदर्भेणेत्याद्युक्तम्। दर्भेणाच्छाद्य पुनर्दर्भेण बन्धीयात् इत्यर्थः[34]।।**

आभरणानां आदानान्तरं यानि बादराणि बीजानि तानि सुवर्णसूत्रेण ग्रथनीयानि। साधारणं वा सूत्रं उपयोज्यं, सवनकर्मणि स्थिते इन्द्रे तस्य वीर्यं दशधा भूमौ पतितम्। तद्रेतः यत्र पतितं बिन्दुषु प्रथमं शालिसस्यमभूत्। द्वितीयं बदरमभूत्। यत्कलम् अभवत् इत्यत्र कलायुक्तं हिरण्यं वा अभवत् इत्यर्थः अपि ग्राह्यः। अतः हिरण्यं ज्योतिःस्वरूपं भवति। हिरण्ये ज्योतिः प्रतिष्ठितं भवति। तेजः एव सुवर्णम्। यो हिरण्यं दधाति सः तेजस्वी भवति। तत्तेजः अग्मयं (जलस्वरूपं) अन्नस्वरूपं वा भवति। वर्चः – अन्नमलः अन्नेन सम्पादितं तेजोऽपि वर्चः "तेजः पुरुषयोः वर्चः" इत्यमरः (अमरकोशः – 3-3-228) तेजसा सम्पादितं तद्बलमेव दर्भाः अभूवन् इति श्रुतिवाक्यबलेन हिरण्यदर्भयोः तुल्यं महत्वं प्रतिपादितम्। अत एव दर्भेण आच्छाद्य दर्भेणैव पुनः बध्नीयात् इत्युक्तम्।

**पारिभाषिकसुवर्णप्रमाणम् –**

**यवाष्टतुलितं माषं माषाष्टतुलितं कणम्।**
**कणाष्टतुलितं मानं मानैस्स्वर्णं तथाऽष्टभिः।**
**पणं सुवर्णैर्विंशद्भिः निष्कं त्रिंशत्पणं स्मृतम्[35]।।**

अष्टौ यवाः - माषः
अष्टौ माषाः - कणः
अष्टौ कणाः - मानम्
अष्टौ मानानि - सुवर्णम्
विंशतिसुवर्णानि - पणः
त्रिंशत् पणानि - निष्कः

**समावर्तने होमकार्यम् –**

**तदग्रावुपरि धारयन् आयुष्यं वर्चस्यग्ं उच्चैर्वादि शुनमहग्ं प्रियंमा इयमोषधि इति पञ्चभिर्जुहुयात्[36]।।**

**तदाग्रावुपरि ऊर्ध्वभागे धारयन् वामेन पाणिना गृह्णन् तदग्नौ ग्रथिता भरणोपरि स्रावयन् पञ्चभिर्मन्त्रैः जुहुयात्[37]।।**

अङ्गुलीयक कुण्डलादीन्याभरणानि दर्भैः बद्धानि अग्नेः उपरिभागे वामेन पाणिना गृहीत्वा दक्षिणेन हस्तेन स्रुवमादाय आभरणानि स्पृशन् आयुष्यं इत्यादि पञ्चभिः मन्त्रैः जुहुयात्।

**समावर्तने कुण्डलधारणम् –**

**सम्राजं च विराजं च इत्युदकपात्रे परिप्लाव्य ऋतुबिरिष्ट्वार्तवैः इयमोषधि इति ताभ्यां कुण्डलाभ्यां दक्षिणादिकर्णयोः अलङ्करोति[38]।**

**उदकपात्रे अन्यस्मिन् जलपात्रे परिप्लाव्य प्रक्षाल्य ताब्यां कुण्डलाभ्यां दक्षिणादिकर्णयोः अलङ्करोति[39]।**

**मणिहोमानन्तरं बर्हिर्बन्धं विसृज्य सम्राजं च विराजं चेति उपपात्रे पात्रान्तरे परिप्लाव्य प्रक्षाल्य इत्यर्थः[40]।।**

होमानन्तरं दर्भबन्धं मोचयित्वा उपपात्रस्थितेन जलेन "सम्राजं च विराजं च" इति मन्त्रेण आभरणानि प्रक्षालितानि कार्याणि कुण्डले "ऋतुभिः इष्ट्वार्तवैः" इति मन्त्रेण दक्षिणकर्णे "इयमोषधि" इति मन्त्रेण वामकर्णे अलङ्कुर्यात्।

**समावर्तने मणिमालादिधारणम् –**

**शुभिके इति मणिना कण्ठमामुच्य इदं ब्रह्म पुनीमहे इत्यङ्गुलीयकं गृहीत्वा, ब्रह्मपुनात्विति अङ्गुल्यां निक्षिप्य यदाञ्जनं इति दक्षिणं चक्षुः यन्मेमन इति वामं च अञ्जनेनाञ्जयित्वा इमास्सुमनसः इति स्रजमादाय देवस्यत्वा इत्यादर्शनमवेक्षते[41]।**

**मणिना मणिहारेण तदलाभे येन केन मुक्तादिना मणिना वा कण्ठमामुच्य असज्यं कण्ठे आबध्य, इदं ब्रह्म पुनीमह इति अङ्गुलीयकं गृहीत्वा ब्रह्मपुनात्विति धारयेत्। दक्षिणं चक्षुः नेत्रं वामं चक्षुः चाञ्जनेन कज्जलेनाञ्जयित्वा स्रजं पुष्पमालिकामादाय धारयेत्। आदर्शनं दर्पणं आदायावेक्षेत स्वस्यरूपं अभिवीक्षयेत्[42]।**

शुभिके इति मन्त्रेण सुवर्णाबरणं मौक्तिकहारं वा कण्ठे अलङ्कृत्य "इदं ब्रह्मपुनीमहे" इति मन्त्रेण अङ्गुलीयकमादाय "ब्रह्मपुनातु" इति मन्त्रेण धारयेत्। "यदञ्जनम्" इति मन्त्रेण दक्षिणनेत्रं, "यन्मेमन" इति मन्त्रेण वामनेत्रं अञ्जनं लेपयेत्। "इमास्सुमनसः" इति मन्त्रेण पुष्पमालां कण्ठे धारयेत्। "देवस्यत्वा" इति मन्त्रेण दर्पणं पश्येत्।

**समावर्तने अङ्गुलीयकधारणम् –**

**इदं ब्रह्मपुनीमहे इति पवित्रं गृहीत्वा ब्रह्मपुनात्विति अङ्गुल्यां निक्षिपति। सुवर्णं पवित्रमिति श्रूयते[43]।**

**कौशं पवित्रं ताम्रंवां राजतं हैममेव च।**
**बिभृयाद्दणे पाणौपवित्रं चोत्तरोत्तरम्।।**

"इदं ब्रह्मपुनीमहे" इति मन्त्रेण पवित्रं गृहीत्वा ब्रह्मपुनातु इति अङ्गुल्या धारयेत्। सौवर्णं पवित्रमिति केचित्। अन्यासु स्मृतिषु कुशैः ताम्रेण वा रजतेन वा हेम्ना वा कृतं अङ्गुलीयकं धारयेत्। हैमं श्रेष्ठमिति निरूपितम्।

**समावर्तने अञ्जनधारणम् –**

**अञ्जने श्रुतिः इन्द्रोवृत्रमहन् तस्यकनीनिकाऽपतत् इत्यारभ्य यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते, दक्षिणां पूर्वमाङ्क्ते सव्यं हि पूर्वमित्यादि[44]।।**

इन्द्रः वृत्रं जघान तदा वृत्रस्य नेत्रात् कनीनिका पतिता इत्यञ्जने श्रुतिः तदारभ्य यदान्ते चक्षुरेव इति पर्यन्तं अञ्जनधारणं उक्तम्। आङ् ते इति अञ्जू व्यक्तिकान्तिगत्यादिषु इति धातोः भावकर्मणोः इति सूत्रेण कर्मणि आत्मनेपदम्। भ्रातृव्यः दायादः तस्माद्रक्षितो भवतीति श्रुतेः तात्पर्यम्।

**समावर्तने मालाधारणम् –**

**ततो वरस्य कण्ठे सामलां चम्पकनिर्मिताम्।**
**निवेशयामास तदा जनमध्ये मनोरमाम्[45]।।**

सेतुमाहात्म्ये स्कान्दपुराणात् गृहीतश्लोकः तत्र प्रमाणम्। कन्या गन्धफलपुष्पैः निर्मितां स्रजं वरस्य कण्ठे निवेशयति तेन मनसः आह्लादो भवति।

**समावर्तने दण्डग्रहणम् –**

**तेनैव वैणवं दण्डमृजुं गृह्णीयात्[46]।।**

**तेनैव देवस्यत्वेति मन्त्रेण वेणुसम्बन्धिवैणवं दण्डं गृह्णीयात्[47]।।**

**तेनैव देवस्यत्वेति मन्त्रेण, तेजोवैवेणुः इति तेः। वैणवो दण्ड उक्तः। दण्डलक्षणं च।**

**षडष्टपर्वं सलिलावगाहं मूलात्तु पुच्छं द्विगुणप्रमामम्।**
**कल्माषं पुच्छं न च काकपृष्ठं एवंविदं दण्डमुशन्ति धार्यम्[48]।।**

वैखानसकल्पसूत्रे वेणुनिर्मितं, निर्वक्रं दण्डं धार्यमिति स्पष्टम्। तेनैव देवस्य ...... इति मन्त्रेण वेणुनिर्मितं दण्डं धार्यम्। तेजो वै वेणुः इति श्रुतिः दण्डप्रमाणं लक्षणं च दीक्षितीये एव एवं निरूपितम्। षट्पर्वयुक्तं, अष्टपर्वयुक्तं जले प्राक् प्लावितः ततः रन्ध्रादिदोषरहितः दण्डो ग्राह्यः। मूलभागात् अन्तमभागः द्विगुणो भवेत्। हस्ते धार्यं स्थूलं, पादसमीपस्थं सूक्ष्मं भवेदिति व्यवहारेण ग्राह्यम्। स च दण्डः कलङ्कयुक्तः काकपुष्टवत् शकलयुक्तो वा न भवेत्।

**इन्द्रस्य वज्रोऽसि इति वेगवेजमिति त्रिरुन्मार्ष्टि[49]।**
**त्रिःकृत्व उन्मार्ष्टि मूलादग्रं परिमृजति[50]।।**

इन्द्रस्य वज्रोऽसि इति मन्त्रेण, वेगवेजं इति मन्त्रेण च मूलभागम् आरभ्य अग्रभागपर्यन्तं त्रिवारं दण्डं शुद्धं कुर्यात्। यो मे दण्ड इति मन्त्रेण सति प्रमादे दण्डमादद्यात्।

**यो मे दण्ड इति पुनर्दण्डं प्रमादे सत्याहरेत्[51]।**

**पुनर्दण्डमिति पूर्वदण्डस्य प्रमादे भग्नादिना नष्टे सति पुनरन्यद्दम्डमेतन्मन्त्रेण आहरेत् गृह्णीयात्[52]।।**

**प्रमादेनाशे।पूर्वं गृहीत दण्डस्य इत्यर्थः[53]।।**

**विश्वामित्रा हि पशुषु विषमे कर्दमस्थले।**
**अन्धे तमसि वार्धक्ये दण्डं दशगुणं भवेत्[54]।।**

पूर्वदण्डे नष्टे भग्ने वा पुनः दण्डग्रहणं यो मे दण्ड इति मन्त्रेण कार्यम्।

विः – पक्षी, श्वा – शुनकः, अमित्रः – शत्रुः, पशुः – जन्तुः, विषमः – निम्नोन्नतभूभागः, अहिः – सर्पः, कर्दमं – पङ्कः, अन्धे – नेत्रहीनत्वं, तमसि – अन्धकारे, वार्धक्ये – वयस्यतीते दण्डः दशगुणवान् भवति।

**समावर्तने उपानच्छत्रयोर्धारणम् –**

**उपानहावित्युपानहा वारुह्य प्रजापतेश्शरणं, भुवः पुनातु इति द्वाभ्यां छत्रं गृह्णीयात्[55]।।**

**उपानहौ पादत्राणावारुह्य पद्भ्यामारुह्य छत्रमात्रपत्रं गृह्णीयात्[56]।**

"उपानहा" इति मन्त्रेण दारुनिर्मिते पादुके धार्ये। प्रजापतेष्म रणं भुवः पुनातु इति मन्त्रेण च छत्रं ग्राह्यम्।

एवं समावर्तनं विधिमुक्त्वा बोधनायनादिषु स्मृतिषु स्नातकधर्माः अपि विस्तरेण निरूपिताः।

**स्नातकधर्माः –**

**स्वाध्याये नित्ययुक्तः स्याद्बहिर्माल्यं च धारयेत्।**
**शक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शिनः [57]।।**

नित्यं वेदाध्ययनं करणीयम्, बहिर्गच्छन् अलंकृतो गच्छेत् ये च शरीरहानिकराः ताः क्रियाः त्याज्याः। वृक्षारोहणं, कूपावतरणं, बाहुभ्यां नदीतरणं इत्यादि न कुर्यात्।

श्रीवैखानसकल्पसूत्रे -

**समावर्तनानन्तरं विवाहः –**

**गरुडाऽनुमतः स्नात्व समावृत्तो यथाविधिः।**
**तद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्[58]।।**

इति मनुः। ब्राह्मणादयः कृतसमावर्तनाः स्वकुलजां सर्वलक्षणान्वितां कन्यां उद्वहेयुः। ब्राह्मणस्य ब्राह्मणकन्या पत्नी इत्यादि नियमः स्मृतिषु द्रष्टव्यः।

**ब्राह्मणभोजनम् –**

स्नातकः तद्व्रताङ्गरूपेण कनिष्ठसंख्यया अष्टौ इति ब्राह्मणान् भोजयेत्। यज्ञशिष्टं च भुञ्जीत।

एवं स्नातकसंस्कारस्तु लोके अतीवश्रेष्ठः। यतो हि तत्संस्कारानन्तरमेव ब्रह्मचर्य-वानप्रस्थ-सन्यासाश्रमत्रयाणाम् आधारभूते योगक्षेमकारके गृहस्थधर्मे प्रवेशः सिद्ध्यति। अतः पत्रे अस्मिन् तत्समावर्तननियमाः स्नातकधर्माः परिणयविधिश्च वैखानसस्मृत्यादिप्रमाणेन यथामति निरूपिताः। विद्वद्भिः विस्तरस्तु आगममुखेन ग्राह्यः इत्यलं विस्तरेण।

**उपयुक्तग्रन्थसूची –**


**1. कूर्मपुराणे**
**2. मनुस्मृतिः**
**3. श्रीवैखानसकल्पसूत्रम्**
**4. नृसिंहवाजपेयभाष्यम्**
**5. श्रीनिवासदीक्षितीयभाष्यम्**
**6. तालपत्रग्रन्थः**
**7. तात्पर्यचिन्तामणिः**
**8. गार्ग्यस्मृतिः**
**9. काठकगृह्यसूत्रम्**
**10. स्मृतिमुक्ताफलम्**
**11. स्मृतिमुक्तावली**


**संदर्भ :**

1. नृसिंहवाजपेयभाष्ये – 2-3-112, पुट-37
2. स्मृतिमुक्तावली – पुट-71
3. स्मृतिमुक्ताफलम् – पुट-90
4. श्रीनिवासदीक्षितीये – पुट-252
5. श्रीवैखानसकल्पसूत्रे, 2-प्रश्न, 13-खण्ड, 113-सू
6. (नृसिंहवाजपेयभाष्ये) श्रीवैखानसकल्पसूत्रे – 2-13-113
7. दीक्षितीये – पुट-252
8. दीक्षितीये – पुट-252
9. दीक्षितीये – पुट-252
10. स्मृतिमुक्ताफलम् – पुट-92
11. काठकगृह्यसूत्रे – स्मृतिमुक्ताफलम् – पुट-93
12. तात्पर्यचिन्तामणौ – पुट-253
13. श्रीवैखानसकल्पसूत्रे - 2-13-114
14. श्रीवैखानसकल्पसूत्रे (2-12-114)
15. दीक्षितीये – पुट-254
16. तात्पर्यचिन्तामणि – 254
17. तात्पर्यचिन्तामणि – 254
18. तात्पर्यचिन्तामणि – 254
19. गार्ग्यः -
20. गार्ग्यः – दीक्षितीये – 255
21. श्रीवैखानसकल्पसूत्रे – 2-13-116
22. श्रीवैखानसकल्पसूत्रे – 2-13-117
23. श्रीवैखानसकल्पसूत्रे – 2-13-118
24. दीक्षितीये – पुट-256
25. नृसिंहवाजपेयभाष्ये
26. श्रीवैखानसकल्पसूत्रे – 3-14-119
27. नृसिंहवाजपेयभाष्ये
28. श्रीवैखानससूत्रकल्पे – 2-14-120
29. श्रीवैखानसकल्पसूत्रे – 3-14-119
30. नृसिंहवाजपेयभाष्ये
31. श्रीवैखानससूत्रकल्पे – 2-14-120
32. श्रीवैखानसकल्पसूत्रे – 2-12-121
33. श्रीवैखानसकल्पसूत्रे – 2-4-122
34. दीक्षितीये 258 – बोधायनः –
35. दीक्षितीये – 258
36. श्रीवैखानसकल्पसूत्रे - 2-15-123
37. नृसिंहवाजपेयभाष्ये
38. श्रीवैखानसकल्पसूत्रे – 1-15-124
39. नृसिंहवाजपेयभाष्ये –
40. दीक्षितीये – पुट-259
41. श्रीवैखानसकल्पसूत्रे – 2-15-125
42. नृसिंहवाजपेयभाष्ये –
43. दीक्षितीये – पुट-259
44. दीक्षितीये – पुट-260
45. दीक्षितीये –
46. श्रीवैखानसकल्पसूत्रे – 2-15-126
47. नृसिंहवाजपेयभाष्ये
48. दीक्षितीये – पुट-260
49. श्रीवैखानसकल्पसूत्रे - 2-15-127
50. नृसिंहवाजपेयभाष्ये –
51. श्रीवैखानसकल्पसूत्रे – 2-15-129
52. नृसिंहवाजपेयभाष्ये –
53. दीक्षितीये – पुट-261
54. तालपत्रग्रन्थे
55. श्रीवैखानसकल्पसूत्रे – 2-15-128
56. नृसिंहवाजपेयभाष्ये –
57. कूर्मपुराणे – स्मृतिमुक्ताफलम् – पुट-92
58. मनुस्मृतिः